# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ३३

रावणग्रहणं तत्तु वायुग्रहणसंनिभम् ।
ऋषिः पुलस्त्यः शुश्राव कथितं दिवि दैवतैः ॥ १॥

ततः पुत्रसुतस्नेहात्कम्प्यमानो महाधृतिः ।
माहिष्मतीपतिं द्रष्टुमाजगाम महानृषिः ॥ २॥

स वायुमार्गमास्थाय वायुतुल्यगतिर्द्विजः ।
पुरीं माहिष्मतीं प्राप्तो मनःसन्तापविक्रमः ॥ ३॥

सोऽमरावतिसङ्काशां हृष्टपुष्टजनावृताम् ।
प्रविवेश पुरीं ब्रह्मा इन्द्रस्येवामरावतीम् ॥ ४॥

पादचारमिवादित्यं निष्पतन्तं सुदुर्दृशम् ।
ततस्ते प्रत्यभिज्ञाय अर्जुनाय न्यवेदयन् ॥ ५॥

पुलस्त्य इति तं श्रुत्वा वचनं हैहयाधिपः ।
शिरस्यञ्जलिमुद्धृत्य प्रत्युद्गच्छद्द्विजोत्तमम् ॥ ६॥

पुरोहितोऽस्या गृह्यार्घ्यं मधुपर्कं तथाइव च ।
पुरस्तात्प्रययौ राज्ञ इन्द्रस्येव बृहस्पतिः ॥ ७॥

ततस्तमृषिमायान्तमुद्यन्तमिव भास्करम् ।
अर्जुनो दृश्य सम्प्राप्तं ववन्देन्द्र इवेश्वरम् ॥ ८॥

स तस्य मधुपर्कं च पाद्यमर्घ्यं च दापयन् ।
पुलस्त्यमाह राजेन्द्रो हर्षगद्गदया गिरा ॥ ९॥

अद्येयममरावत्या तुल्या माहिष्मती कृता ।
अद्याहं तु द्विजेन्द्रेन्द्र यस्मात्पश्यामि दुर्दृशम् ॥ १०॥

अद्य मे कुशलं देव अद्य मे कुलमुद्धृतम् ।
यत्ते देवगणैर्वन्द्यौ वन्देऽहं चरणाविमौ ॥ ११॥

इदं राज्यमिमे पुत्रा इमे दारा इमे वयम् ।
ब्रह्मन्किं कुर्म किं कार्यमाज्ञापयतु नो भवान् ॥ १२॥

तं धर्मेऽग्निषु भृत्येषु शिवं पृष्ट्वाथ पार्थिवम् ।
पुलस्त्योवाच राजानं हैहयानां तदार्जुनम् ॥ १३॥

राजेन्द्रामलपद्माक्षपूर्णचन्द्रनिभानन ।
अतुलं ते बलं येन दशग्रीवस्त्वया जितः ॥ १४॥

भयाद्यस्यावतिष्ठेतां निष्पन्दौ सागरानिलौ ।
सोऽयमद्य त्वया बद्धः पौत्रो मेऽतीवदुर्जयः ॥ १५॥

तत्पुत्रक यशः स्फीतं नाम विश्रावितं त्वया ।
मद्वाक्याद्याच्यमानोऽद्य मुञ्च वत्स दशाननम् ॥ १६॥

पुलस्त्याज्ञां स गृह्याथ अकिञ्चनवचोऽर्जुनः ।
मुमोच पार्थिवेन्द्रेन्द्रो राक्षसेन्द्रं प्रहृष्टवत् ॥ १७॥

स तं प्रमुक्त्वा त्रिदशारिमर्जुनः
प्रपूज्य दिव्याभरणस्रगम्बरैः ।
अहिंसाकं सख्यमुपेत्य साग्निकं
प्रणम्य स ब्रह्मसुतं गृहं ययौ ॥ १८॥

पुलस्त्येनापि सङ्गम्य राक्षसेन्द्रः प्रतापवान् ।
परिष्वङ्गकृतातिथ्यो लज्जमानो विसर्जितः ॥ १९॥

पितामहसुतश्चापि पुलस्त्यो मुनिसत्तमः ।
मोचयित्वा दशग्रीवं ब्रह्मलोकं जगाम सः ॥ २०॥

एवं स रावणः प्राप्तः कार्तवीर्यात्तु धर्षणात् ।
पुलस्त्यवचनाच्चापि पुनर्मोक्षमवाप्तवान् ॥ २१॥

एवं बलिभ्यो बलिनः सन्ति राघवनन्दन ।
नावज्ञा परतः कार्या य इच्छेच्छ्रेय आत्मनः ॥ २२॥

ततः स राजा पिशिताशनानां
सहस्रबाहोरुपलभ्य मैत्रीम् ।
पुनर्नराणां कदनं चकार
चचार सर्वां पृथिवीं च दर्पात् ॥ २३॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com